# श्रीमद्भगवद्गीता

# Śrīmad-Bhagavad-gītā

# The Song of the Lord

# Chapter Seventeen

with the comms. of Śrīdhara, Viśvanātha, and Baladeva

Version 0.1

April 8, 2001

# Chapter 17

# श्रद्धात्रयविभागयोगः

अर्जुन उवाच
ये शास्त्रविधिम् उत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वम् आहो रजस्तमः ॥ १ ॥

श्रीधरः

उक्ताधिकारहेतूनां श्रद्धा मुख्या तु सात्त्विकी ।
इति सप्तदशे गौणश्रद्धाभेदस्त्रिधोच्यते ॥

पूर्वाध्यायान्ते यः शास्त्रविधिम् उत्सृज्य वर्तते कामचारतः । न स सिद्धिम् अवाप्नोतीत्यनेन शास्त्रोक्तविधिम् उत्सृज्य कामचारेण वर्तमानस्य ज्ञानेऽधिकारो नास्तीत्युक्तम् । तत्र शास्त्रम् उत्सृज्य कामचारं विना श्रद्धया वर्तमानानां किम् अधिकारोऽस्ति नास्ति वेति बुभुत्सया'र्जुन उवाच य इति । अत्र च शास्त्रविधिम् उत्सृज्य यजन्त इत्यनेन शास्त्रार्थं बुद्ध्वा तम् उल्लङ्घ्य वर्तमानो न गृह्यते । तेषां श्रद्धया यजनानुपपत्तेः । आस्तिक्यबुद्धिर्हि श्रद्धा । न चासौ शास्त्रविरुद्धेऽर्थे शास्त्रज्ञानवतां सम्भवति । तान् एवाधिकृत्य त्रिविधा भवति श्रद्धेति । यजन्ते सात्त्विका देवान् इत्याद्युत्तरानुपपत्तेश्च । अतो नात्र शास्त्रोल्लङ्घिनो गृह्यन्ते । अपि तु क्लेशबुद्ध्यालस्याद्वा शास्त्रार्थज्ञाने प्रयत्नम् अकृत्वा केवलम् आचारपरम्परावशेन श्रद्धया क्वचिद्देवताराधनादौ प्रवर्तमाना गृह्यन्ते । अतोऽयम् अर्थः ये शास्त्रविधिम् उत्सृज्य दुःखबुद्ध्यालस्यद्वारा अनादृत्य केवलम् आचारप्रामाण्येन श्रद्धया'न्विताः सन्तो यजन्ते तेषां का निष्ठा । का स्थितिः । क आश्रयः । ताम् एव विशेषेण

पृच्छति किं सत्त्वम् । आहो किं वा रजः । अथवा तम इति । तेषां तादृशी देवपूजादिप्रवृत्तिः किं सत्त्वसंश्रिता । रजःसंश्रिता वा । तमःसंश्रिता वेत्यर्थः । श्रद्धायाः सत्त्वसंश्रिता तर्हि तेषाम् अपि सात्त्विकत्वाद्यथोक्तात्मज्ञानेऽधिकारः स्यात् । अन्यथा नेति प्रश्नतात्पर्यार्थः ॥१ ॥

**विश्वनाथः**

अथ सप्तदशे वस्तु सात्त्विकं राजसं तथा ।
तामसं च विविच्योक्तं पार्थप्रश्नोत्तरं यथा ॥

नन्वासुरसर्गम् उक्त्वा तदुपसंहारे

यः शास्त्रविधिम् उत्सृज्य वर्तते कामचारतः ।
न स सिद्धिम् अवाप्नोति न सुखं न परां गतिम् ॥

इति त्वयोक्तम् । तत्राहम् इदं जिज्ञास इत्याह य इति । ये शास्त्रविधिम् उत्सृज्य कामचारतो वर्तन्ते किन्तु कामभोगरहिता एव श्रद्धयान्विताः सन्तो यजन्ते तओप्यज्ञज्ञानयज्ञजपयज्ञादिकं कुर्वन्ति । तेषां का निष्ठा स्थितिः किम् आलम्बनम् इत्यर्थः । तत् किं सत्त्वम् । आहो स्वित् रजः । अथवा तमस्तद्ब्रूहीत्यर्थः ॥१ ॥

**बलदेवः**

सात्त्विकं राजसं वस्तु तामसं च विवेकतः ।
कृष्णः सप्तदशेऽवादीत् पार्थप्रश्नानुसारतः ॥

वेदमधीत्य तद्विधिना तदर्थानुतिष्ठन्तः शास्त्रीयश्रद्धायुक्ता देवाः । वेदम् अवज्ञाय यथेच्छाचारिणो वेदबाह्यास्त्वासुरा इति पूर्वस्मिन्न् अध्याये त्वयोक्तम् । अथेयं मे जिज्ञासा ये शास्त्रेति । ये जनाः पाठतोऽर्थतश्च दुर्गमं वेदं विदित्वालस्यादिना तद्विधिम् उत्सृज्य लोकाचारजातया श्रद्धयान्विताः सन्तो देवादीन् यजन्ते, तेषां शास्त्रविध्युपेक्षाश्रद्धाभ्यां पूर्वनिर्णीतदैवासुरविलक्षणानां का निष्ठा । सत्त्वं संश्रया तेषां स्थितिरथवा रजस्तमः संश्रयेति कोटिद्वयावबोधायाहोशब्दो मध्ये निवेशितः ॥१ ॥

**श्रीभगवान् उवाच**
**त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा**
**सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥२ ॥**

**श्रीधर** : अत्रोत्तरं श्रीभगवान् उवाच त्रिविधेति । अयम् अर्थः शास्त्रतत्त्वज्ञानतः प्रवर्तमानानां परमेश्वरपूजाविषया सात्त्विकी एकविधैव भवति श्रद्धा । लोकाचार-मात्रेण तु प्रवर्तमानानां देहिनां या श्रद्धा सा तु सात्त्विकी राजसी तामसी चेति त्रिविधा भवति । तत्र हेतुः स्वभावजा । स्वभावः पूर्वकर्मसंस्कारः । तस्माज्जाता । स्वभावम् अन्यथा कर्तुं समर्थं शास्त्रोत्थं विवेकज्ञानम् । तत् तु तेषां नास्ति । अतः केवलं पूर्वस्वभावेन भवन्ती श्रद्धा त्रिविधा भवति । ताम् इमां त्रिविधां श्रद्धां शृण्विति । तदुक्तं व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दनेत्यादिना ॥ २ ॥

**विश्वनाथ** : भो अर्जुन प्रथमं शास्त्रविधिम् उत्सृज्य यजतां निष्ठां शृणु । पश्चात् शास्त्रविधित्यागिनां निष्ठां ते वक्ष्यामीत्याह त्रिविधेति । स्वभावः प्राचीनसंस्कार-विशेषस्तस्माज्जाता श्रद्धा । सा च त्रिविधा ॥ २ ॥

**बलदेव** : एवं पृष्टो भगवान् उवाच त्रिविधेति । आलस्यात् क्लेशाच्च शा-स्त्रविधिम् उत्सृज्य ये श्रद्धया देवादीन् यजन्ते देहिनः । सा तेषां स्वभावजा बोध्या प्राक्तनः शुभाशुभसंस्कारः स्वभावस्तस्माज् जातेत्यर्थः । अनादित्रिगुणप्र-कृतिसंसृष्टानां देहिनाम् अनादितोऽनावृत्तस्य संसारस्य सात्त्विकत्वादिना त्रैविध्यात् तज्जातश्रद्धापि त्रिविधेत्याह सात्त्विकीत्यादि । स्वभावम् अन्यथयितुं समर्था ख-लु सदुपदिष्टशास्त्रजन्या विवेकसंवित् सा तेषां नास्त्यतः स्वभावजा श्रद्धा त्रिविधा भवति । तादृक्शास्त्रजन्या श्रद्धा त्वन्यैव यथा तदुक्तिविधिनैव तदर्थानुष्ठानम् ॥ २ ॥

> सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
> श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥ ३ ॥

**श्रीधर** : ननु च श्रद्धा सात्त्विक्येव सत्त्वकार्यत्वेन त्वयैव श्रीभागवते उद्धवं प्रति निर्दिष्टत्वात् । यथोक्तं

> शमो दमस्तितिक्षेत्ज्या तपः सत्यं दया स्मृतिः ।
> तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दया निर्वृत्तिर्धृतिः ॥

इत्येताः सत्त्वस्य वृत्तयः । इति ।

अथ कथं तस्यास्त्रैविध्यम् उच्यते । सत्यम् । तथापि रजस्तमोयुक्तपुरुषाश्रयत्वेन रजस्तमोमिश्रितत्वेन सत्त्वस्य त्रैविध्यात् श्रद्धाया अपि त्रैविध्यं घटते इत्याहसत्त्वानु-रूपेति । सत्त्वानुरूपा सत्त्वतारतम्यानुसारिणी सर्वस्य विवेकिनोऽविवेकिनो लोकस्य श्रद्धा विक्रिअत इत्यर्थः । तदेवाह यो यच्छ्रद्धः यादृशी श्रद्धा यस्य । स एव सः । तादृशश्रद्धायुक्त एव सः । यः पूर्वं सत्त्वोत्कर्षेण सात्त्विकश्रद्धया युक्तः पुरुषःस

पुनस्तादृश स्वसंस्कारेण सात्त्विकश्रद्धयायुक्त एव भवति । यस्तु रजस उत्कर्षेण राजसश्रद्धया युक्तः स पुनस्तदृश एव भवति । यस्तु तमस उत्कर्षेण तामसश्रद्धया युक्तः स पुनस्तदृश एव भवति । लोकाचारमात्रेण प्रवर्तमानेष्वेवं सात्त्विकराजस-तामसश्रद्धाव्यवस्था । शास्त्रजनितविवेकज्ञानयुक्तानां तु स्वभावविजयेन सात्त्विकी एकैव श्रद्धेति प्रकरणार्थः ॥ ३ ॥

**विश्वनाथ**: सत्त्वम् अन्तःकरणं त्रिविधं सात्त्विकं राजसं तामसं च । तद-नुरूपा सात्त्विकान्तःकरणानां सात्त्विक्येव श्रद्धा । राजसान्तःकरणानां राजस्येव । तामसान्तःकरणानां तामस्येवेत्यर्थः । यच्छ्रद्धो यस्मिन् यजनीये देवेऽसुरे राक्षसे वा श्रद्धावान् यो भवति । स स एव भवति तत् तच् छब्देनैव व्यपदिश्यत इत्यर्थः ॥ ३ ॥

**बलदेव**: यद्यपि श्रद्धा सत्त्वगुणवृत्तिस् तथाप्यन्तःकरणधर्मस्य स्वभावस्या-न्तःकरणस्य च धर्मिणस्त्रैविध्यात् तदुदितायास्तस्यास्त्रैविध्यं सिद्ध्येदिति भावेनाह सत्त्वानुरूपेति । सत्त्वम् अन्तःकरणं त्रिगुणात्मकं तदनुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवति । सत्त्वप्रधानान्तःकरणस्य श्रद्धा सात्त्विकी । रजःप्रधानान्तःकरणस्य तु राजसी । तमःप्रधानान्तःकरणस्य तु श्रद्धा तामसीति । अतोऽयं पूज्यपूजकरूपो लौकिकः पुरुषः श्रद्धामयस् त्रिविधश्रद्धाप्रचुरो यः पुरुषो यच्छ्रद्धो यस्मिन् पूज्ये देवादौ यक्षादौ प्रेतादौ च श्रद्धावान् भवति । स पूजकोऽपि स एव तत्तच्छब्देन व्यपदेश्य पूज्यगुणवान् पूजक इत्यर्थः ॥ ३ ॥

**यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।**
**प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥ ४ ॥**

**श्रीधर**: सात्त्विकादिभेदम् एव कार्यभेदेन प्रपञ्चयति यजन्त इति । सात्त्विका जनाः सत्त्वप्रकृतीन् देवान् एव यजन्ते पूजयन्ति । राजसास्तु रजःप्रकृतीन् यक्षान् रक्षसांश्च यजन्ते । एतेभ्योऽन्ये विलक्षणास्तामसा जनास् तामसान् एव प्रेतान् भूतगणांश्च यजन्ते । सत्त्वादिप्रकृतीनां तत्तद्देवादीनां पूजारुचिभिस् तत्तत्पूजकानां सात्त्विकादित्वं ज्ञातव्यम् इत्यर्थः ॥ ४ ॥

**विश्वनाथ**: उक्तम् अर्थं स्पष्टयति सात्त्विकान्तःकरणाः सात्त्विक्या श्रद्धया सा-त्त्विकशास्त्रविधिना सात्त्विकान् देवान् एव यजन्ते । देवेष्वेव श्रद्धावत्त्वाद्देवा एवो-च्यन्ते । एवं राजसा राजसान्तःकरणा इत्यादि विवरितव्यम् ॥ ४ ॥

**बलदेव**: कार्यभेदेन सात्त्विकादिभेदं प्रपञ्चयति यजन्त इति । शास्त्रीयविवेक-संविद्विहीना ये जनाः स्वभावजया श्रद्धया देवान् सात्त्विकान् वसुरुद्रादीन् यजन्ते

तेऽन्ये राजसाः । ये प्रेतान् भूतगणांश्च तामसा यजन्ते तेऽन्ये तामसाः । द्विजाः स्वधर्मविभ्रष्टा देहपातोत्तरलब्धवायवीयदेहा उल्कामुखकटपूतनादिसंज्ञाः प्रेता मनूक्ताः पिशाचविशेषा वेति व्याख्यातारश्चात् सप्तमातृकादयः । एवम् आलस्यात् त्यक्तवेदविधीनां स्वभावान् सात्त्विकाद्या निरूपिताः । एते च बलवद्वैदिकसत्प्रसङ्गात् स्वभावान् विजित्य कदाचिद्वेदेऽप्यधिकृतो भवन्तीति बोध्यम् ॥ ४ ॥

**अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।**
**दम्भाहंकारसंयुक्ताः कामरागबलान्विताः ॥ ५ ॥**
**कर्शयन्तः शरीरस्थं भूतग्रामम् अचेतसः ।**
**मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् ॥ ६ ॥**

**श्रीधरः** राजसतामसेष्वपि पुनर्विशेषान्तरम् आह अशास्त्रविहितम् इति द्वाभ्याम् । शास्त्रविधिम् अजानन्तोऽपि केचित् प्राचीनपुण्यसंस्कारेण उत्तमाः सात्त्विका एव भवन्ति । केचिन् मध्यमा राजसा भवन्ति । अधमास्तु तामसा भवन्ति । ये पुनरत्यन्तं मन्दभाग्यास्ते गतानुगत्या पाषण्डसङ्गेन च तदाचारानुवर्तिनः सन्तोऽशास्त्रविहितं घोरं भूतभयङ्करं तपस्तप्यन्ते कुर्वन्ति । तत्र हेतवः दम्भाहङ्काराभ्यां संयुक्ताः । तथा कामोऽभिलाषः । राग आसक्तिः । बलम् आग्रहः । एतैरन्विताः सन्तः । तान् आसुरनिश्चयान् विद्धीत्युत्तरेणान्वयः ॥ ५ ॥

किं च कर्शयन्त इति । शरीरस्थं प्रारम्भकत्वेन देहे स्थितं भूतानां पृथिव्यादीनां ग्रामं समूहं कर्शयन्तो वृथैव उपवासादिभिः कृशं कुर्वन्तोऽचेतसोऽविवेकिनः । मां च अन्तर्यामितयान्तःशरीरस्थं देहमध्ये स्थितं मदाज्ञालङ्घनेनैव कर्शयन्तः । एवं ये तपश्चरन्ति तान् आसुरनिश्चयान् । आसुरोऽतिक्रूरो निश्चयो येषां तान् विद्धि ॥ ६ ॥

**विश्वनाथः** यस्त्वया पृष्टं ये शास्त्रविधिम् उत्सृज्य कामभोगरहिताः श्रद्धया यजन्ते तेषां का निष्ठा इति । तस्योत्तरम् अधुना शृण्वित्याह अशास्त्रेति द्वाभ्याम् । घोरं प्राणिभयङ्करं तपस्तप्यन्ते कुर्वन्तीत्युपलक्षणम् इदं जपयागादिकम् अप्यशास्त्रीयं कुर्वन्ति । कामाचरणराहित्यं श्रद्धान्वितत्वं च स्वत एव लभ्यते । दम्भाहङ्कारसंयुक्ता इति । दम्भाहङ्काराभ्यां विना शास्त्रविध्युल्लङ्घनानुपपत्तेः । कामः स्वस्याजरामरत्वराज्याद्यभिलाषो रागस्तपस्यासक्तिर्बलं हिरण्यकशिपुप्रभृतीनाम् इव तपःकरणसामर्थ्यम् । तैरन्विताः शरीरस्थम् अयम्भकत्वेन देहस्थितम् । भूतानां पृथिव्यादीनां ग्रामं समूहं कर्शयन्तः कृशीकुर्वन्तो मां च मदंशभूतं जीवं च दुःखयन्तः । आसूयनिश्चयान् असुराणाम् एव निष्ठायां स्थिताम् इत्यर्थः ॥ ५-६ ॥

**बलदेवः** वेदबाह्यानां कदाचिदपि दुर्गतेर्निस्तारो नेति पूर्वाध्यायोक्तं दृढयन्न् आह अशास्त्रेति द्वाभ्याम् । अशास्त्रेण वेदविरुद्धेन स्वागमेन विहितं घोरं परपीडकं

तपो ये तप्यन्ते कुर्वन्ति कामरागो विषयस्पृहा बलं च मया शक्यम् एतत् सिद्धैः कर्तुम् इति दुराग्रहः शरीरस्थम् आरम्भकतया शरीरं स्थितं भूतग्रामं पृथिव्यादिसङ्घातं कर्षयन्तो वृथोपवासादिना कृशं कुर्वन्तोऽन्तःशरीरस्थं शरीरमध्यगतान्तर्यामिणं मां चावज्ञया कर्षयन्तोऽचेतसः शास्त्रीयविवेकसंविद्विहीनास् तान् वेदबाह्यान् आसुरनिश्चयान् निश्चयेनासुरान् विद्धीति पूर्वोक्तानां तेषां दुर्गतिरवर्जनीयैवेति भावः । स्वभावजया श्रद्धया यक्षरक्षःप्रेतादीन् यजतां बलवद्दैदिकसदनुग्रहे सति शास्त्रीयश्रद्धयासुरभावविनाशः स्यादेव । देवान् यजतां तु वस्तुतः सात्त्विकत्वात् तदनुग्रहे सति शास्त्रीया सुलभेति स्थितम् ॥ ५-६ ॥

## आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
## यज्ञस्तपस्तथा दानं तेषां भेदम् इमं शृणु ॥ ७ ॥

**श्रीधरः** आहारादिभेदादपि सात्त्विकादिभेदं दर्शयितुम् आह आहारस्त्वित्यादित्रयोदशभिः । सर्वस्यापि जनस्य य आहारोऽन्नादि स तु यथायथं त्रिविधः प्रियो भवति । तथा यज्ञतपोदानानि च त्रिविधानि भवन्ति तेषां वक्ष्यमानं भेदम् इमं शृणु । एतच्च राजसतामसाहारयज्ञादिपरित्यागेन सात्त्विकाहारयज्ञादिसेवया सत्त्ववृद्धौ यत्नकर्तव्य इत्येतदर्थं कथ्यते ॥ ७ ॥

**विश्वनाथः** तदेवं ये शास्त्रविधित्यागिनः कामचारेण वर्तन्ते पूर्वाध्यायोक्ता ये चास्मिन्न् अध्याये आसुरशास्त्रविधिना यक्षरक्षःप्रेतादीन् यजन्ते, ये चाशास्त्रीयं तपाअदिकं कुर्वन्ति ते सर्वे आसुरसर्गमध्यगता एव भवन्तीति प्रकरणार्थः । तथाप्याहारादीनां वक्ष्यमाणानां त्रैविध्यात् तद्वतां यथायोगं दैवम् आसुरं च सर्गं स्वयम् एव विविच्य जानीत्याह आहारस्त्वित्यादि त्रयोदशभिः ॥ ७ ॥

**बलदेवः** एवं स्थिते तदाहारादीनामपि त्रैविध्यमाह आहारस्त्विति । श्रद्धावत् सर्वस्य प्रियोऽन्नादिराहारोऽपि त्रिविधो भवति । एवं यज्ञादीनि च त्रिविधानि । तेषामाहारादीनां चतुर्णाम् ॥ ७ ॥

## आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
## रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ ८ ॥

**श्रीधरः** तत्राहारत्रैविध्यम् आह आयुरिति त्रिभिः । आयुर्जीवितम् । सत्त्वम् उत्साहः । बलं शक्तिः । आरोग्यं रोगराहित्यम् । सुखं चित्तप्रसादः । प्रीतिरभिरुचिः । आयुरादीनां विवर्धनाः विशेषेण वृद्धिकराः । ते च रस्या रसवन्तः

। स्निग्धाः स्नेहयुक्ताः । स्थिरा देहे सारांशेन चिरकाल्यावस्थायिनः । हृद्या दृष्टिमात्रादेव हृदयङ्गमाः । एवम्भूता आहारा भक्ष्यभोज्यादयः सात्त्विकप्रियाः ॥ ८ ॥

**विश्वनाथः** सात्त्विकाहारवताम् आयुर्वर्धत इति प्रसिद्धः । सत्त्वम् उत्साहः । रस्या इति केवल गुडादीनां रस्यत्वेऽपि रूक्षत्वम् अत आह स्निग्धा इति । दुग्धफेनादीनां रस्यत्वस्निग्धत्वेऽपि अस्थैर्यम् अत आह स्थिरा इति । पनसफलादीनां रस्यत्वे स्निग्धत्वस्थिरत्वेऽपि हृदुदराद्यहितत्वम् अत आह हृद्या हृदुदरहिता इति । तेन सगव्यशर्कराशालिगोधूमान्नादय एव रस्यत्वादिचतुष्टयगुणवत्त्वात् सात्त्विकलोकप्रिया ज्ञेयास् तेषां प्रियत्वे सत्येव सात्त्विकत्वं च ज्ञेयम् । किं च गुणचतुष्टयवत्त्वेऽपि अपावित्र्ये सति सात्त्विकप्रियतादर्शनादत्र पवित्रा इत्यपि विशेषणं देयम् । तामसप्रियेष्वमेध्यपददर्शनात् ॥ ८ ॥

**बलदेवः** तत्र सात्त्विकाहारम् आह आयुरि इति । आयुश्चिरजीवितम् । सत्त्वम् चित्तधैर्यम् । बलं देहसामर्थ्यं । सुखं तृप्तिः । प्रीतिरभिरुचिः । एतासां विवर्धनाः रम्यत्वादिगुणवन्तः सगव्यशर्कराः शालिगोधूमादयः सात्त्विकानां प्रियास्तैरुपादेया इत्यर्थः । रम्या इति नीरसानां चणकादीनां । स्निग्धा इति रुक्षाणां गुडादीनां । स्थिरा इत्यस्थिराणां दुग्धफेनादीनां । हृद्येत्यहृद्यानां पनसफलादीनां च व्यावृत्तिः । क्षुदुदराद्यहितत्वम् अहृद्यत्वम् । अत्र पवित्रा इति ज्ञेयम् । तामसप्रियेष्वमेध्यपददर्शनात् ॥ ८ ॥

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥ ९ ॥**

**श्रीधरः** तथा कट्विति । अतिशब्दः कट्वादिषु सप्तस्वपि सम्बध्यते । तेनातिकटुर्निःस्वादिः । अत्यम्लोऽतिलवणोऽत्युष्णश्च प्रसिद्धः । अतितीक्ष्णो मरिचादिः । अतिरूक्षः कङ्गुकोद्रवादिः । अतिविदाही सर्षपादिः । अतिकट्वादय आहारा राजसस्येष्टाः प्रियाः । दुःखं तात्कालिकं हृदयसन्तापादि । शोकः पश्चाद्भाविदौर्मनस्यम् । आमयो रोगः । एतान् प्रददाति प्रयच्छन्तीति तथा ॥ ९ ॥

**विश्वनाथः** अतिशब्दः कट्वादिषु सप्तस्वपि सम्बध्यते । अतिकटुर्निम्बादिः । अत्यम्लवणोष्णः प्रसिद्ध एव । अतितीक्ष्णो मूलिकाविषादिर्मरीच्याद्या वा । अतिरूक्षो हिङ्गुकोद्रवादिः । विदाही दाहकरो भृष्टचणकादिः । एते दुःखादिप्रदाः । तत्र दुःखं तात्कालिको रसनाकण्ठादिसन्तापः । शोकः पश्चाद्भाविदौर्मनस्यम् । आमयो रोगः ॥ ९ ॥

**बलदेव**: राजसाहारम् आह कट्विति । सप्तस्वतिशब्दो योज्यः । अतिकटुरिति तिक्तो निम्बादिर्न च मरिचादिस्तस्य तीक्ष्णशब्देनोक्तेरत्यम्लोऽतिलवणोऽत्युष्णश्च । ख्यातोऽतितीक्ष्णो मरीच्यादिरतिरुक्षः कङ्कादिरतिदाही राजिकादिः । एते राजसस्येष्टाः, सात्त्विकानां तु हेयाः । दुःखं तात्कालिकं जिह्वा कण्ठादिशोषणजम् । शोको दौर्मनस्यं पाश्चात्यम् आमयो रुधिरकोपः ॥ ९ ॥

**यातयामं गतरसं पूति पर्युषितं च यत् ।**
**उच्छिष्टम् अपि चामेध्यं भोजनं तामसप्रियम् ॥ १० ॥**

**श्रीधर**: तथा यातयामम् इति । यातो यामः प्रहरो यस्य पक्वस्यौदनादेस्तद्यातयामम् । शैत्यावस्थां प्राप्तम् इत्यर्थः । गतरसं निष्पीडितसारम् । पूति दुर्गन्धम् । पर्यूषितं दिनान्तरपक्वम् । उच्छिष्टम् अन्यभुक्तावशिष्टम् । अमेध्यम् अभक्ष्यं कलञ्ज्यादि । एवम्भूतं भोजनं तामसस्य प्रियम् ॥ १० ॥

**विश्वनाथ**: यातो यामः प्रहरो यस्य पक्वस्यौदनादेस्तद्यातयामं शैत्यावस्थां प्राप्तम् इत्यर्थः । गतरसं गतस्वाभाविकरसं निष्पीडितरसम् पक्वाम्रत्वगष्ठ्यादिकं वा । पूति दुर्गन्धम् । पर्यूषितं दिनान्तरपक्वम् । उच्छिष्टम् गुर्वादिभ्योऽन्येषां भुक्तावशिष्टम् । अमेध्यम् अभक्ष्यं कलञ्जादि । ततश्चैवं पर्यालोच्य स्वहितैषिभिः सात्त्विक आहारः सेव्य इति भावः । वैष्णवैस्तु सोऽपि भगवदनिवेदितस्त्याज्य एव । भगवन्निवेदितम् अन्नादिकं तु निर्गुणभक्तलोकप्रियम् इति श्रीभागवताज्ज्ञेयम् ॥ १० ॥

**बलदेव**: तामसाहारम् आह यातेति । यातोऽतिक्रान्तो यामः प्रहरो यस्य राद्धस्यान्नादेस् तद्यातयामम् । गतरसं वैरस्यवत् । पूतिः दुर्गन्धम् । पर्युषितं पूर्वेऽह्नि राद्धम् उच्छिष्टं गुरोरन्येषां भुक्तावशिष्टम् अमेध्यम् अपवित्रं कलञ्जादि । ईदृग्भोजनं तामसानां प्रियं सात्त्विकानां त्वतिदूरतो हेयम् ॥ १० ॥

**अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।**
**यष्टव्यम् एवेति मनः समाधाय स सात्त्विकः ॥ ११ ॥**

**श्रीधर**: यज्ञोऽपि त्रिविधः । तत्र सात्त्विकं यज्ञम् आह अफलाकाङ्क्षिभिरिति । फलाकाङ्क्षारहितैः पुरुषैर्विधिनादिष्ट आवश्यकतया विहितो यो यज्ञ इज्यतेऽनुष्ठीयते स सात्त्विको यज्ञः । कथम् इज्यते । यष्टव्यम् एवेति । यज्ञानुष्ठानम् एव कार्यम् । नान्यत् फलं साधनीयम् इत्येवं मनः समाधायैकाग्रं कृत्वेत्यर्थः ॥ ११ ॥

**विश्वनाथ**: अथ यज्ञस्य त्रैविध्यम् आह अफलाकाङ्क्षिभिरिति । फलाकाङ्क्षा-राहित्ये कथं यज्ञे प्रवृत्तिरत आह यष्टव्यम् एवेति ।स्वानुष्ठेयत्वेन शास्त्रोक्तत्वादवश्यकर्तव्यम् एतदिति मनः समाधाय ॥११ ॥

**बलदेव**: अथ यज्ञत्रैविध्यम् आह अफलेति त्रिभिः । अफलाकाङ्क्षिभिः फलेच्छाशून्यैर्यो यज्ञ इज्यते क्रियते विधिदृष्टो विधिवाक्याज्जातः स सात्त्विकः । ननु फलेच्छां विना तत्र कथं प्रवृत्तिस्तत्राह यष्टव्यमेवेति । मां प्रति वेदेनोक्तत्वात् तत् यजनम् एव कार्यं, न तु तेन फलं साध्यम् इति मनः समाधायैकाग्रं कृत्वेत्यर्थः ॥ ११ ॥

अभिसंधाय तु फलं दम्भार्थम् अपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२ ॥

**श्रीधर**: राजसं यज्ञम् आह अभिसन्धायेति । फलम् अभिसन्धायोद्दिश्य तु यदिज्यते यज्ञः क्रियते ।दम्भार्थं च स्वमहत्त्वख्यापनार्थं च ।तं यज्ञं राजसं विद्धि ॥१२ ॥

**बलदेव**: फलं स्वर्गादिकमभिसन्धाय यदिज्यते दम्भाहृतं वा स्वमहिमख्यापनाय, तं यज्ञं राजसं विद्धि ॥१२ ॥

विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१३ ॥

**श्रीधर**: तामसं यज्ञम् आह विधिहीनम् इति । विधिहीनं शास्त्रोक्तविधिशून्यम् असृष्टान्नं ब्राह्मणादिभ्यो न सृष्टं न निष्पादितम् अन्नं यस्मिंस्तम् ।मन्त्रैर्हीनं । यथोक्तदक्षिणारहितं श्रद्धाशून्यं च यज्ञं तामसं परिचक्षते कथयन्ति शिष्टाः ॥१३ ॥

**विश्वनाथ**: असृष्टान्नमन्नदानरहितम् ॥१३ ॥

**बलदेव**: विधीति असृष्टान्नम् अन्नदानरहितं मन्त्रहीनं स्वरतो वर्णतश्च हीनेन मन्त्रणोपेतं श्रद्धाविरहितं ऋत्विग्विद्वेषात् ॥१३ ॥

देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवम् ।
ब्रह्मचर्यम् अहिंसा च शारीरं तप उच्यते ॥१४ ॥

**श्रीधर**: तपसः सात्त्विकादिभेदं दर्शयितुं प्रथमं तावत् शारीरादिभेदेन तस्य त्रैविध्यम् आह देवेत्यादि त्रिभिः ।तत्र शारीरम् आह देवेति ।प्राज्ञा गुरुव्यक्तिरिक्ता अन्येऽपि तत्त्वविदः ।देवब्राह्मणादिपूजनं शौचादिकं च शारीरं शरीरनिर्वर्त्यं तप उच्यते ॥१४ ॥

**विश्वनाथ**: तपसस्त्रैविध्यं वदन प्रथमं सात्त्विकस्य तपसस्त्रैविध्यम् आह देवेत्यादि त्रिभिः ॥१४ ॥

**बलदेव**: क्रमप्राप्तस्य तपसः सात्त्विकादिभेदं वक्तुं तस्यादौ शारीरादिभावेन त्रैविध्यम् आह देवेति त्रिभिः ।देवा वसुरुद्रादयो द्विजा ब्राह्मणश्रेष्ठा गुरवो मातृपितृदेशिकाः प्राज्ञा विदितवेदवेदाङ्गाः परेऽत्र तेषां पूजनम् ।शौचं द्विविधम् उक्तम् ।आर्जवं विहितनिषिद्धयोरैक्यरूप्येण प्रवृत्तिनिवृत्तत्वम् ।ब्रह्मचर्यं विहितमैथुनं च ।एतच् छारीरं शरीरनिर्वर्त्यं तपः ॥१४ ॥

> अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
> स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५ ॥

**श्रीधर**: वाचिकं तप आह अनुद्वेगकरम् इति ।उद्वेगं भयं न करोतीत्यनुद्वेगकरं वाक्यम् ।सत्यं श्रोतुः प्रियम् ।हितं च परिणामे सुखकरम् ।स्वाध्यायाभ्यसनं वेदाभ्यासश्च वाङ्मयं वाचा निर्वर्त्यं तपः ॥१५ ॥

**विश्वनाथ**: अनुद्वेगकरं सम्बोध्यभिन्नानाम् अप्युनुद्वेजकम् ॥१५ ॥

**बलदेव**: अनुद्वेगकरम् उद्वेगं भयं कस्यापि यन् न करोति ।सत्यं प्रमाणिकम् ।श्रोतुः प्रियम् ।परिणामे हितं च ।एतद्विशेषणचतुष्टयवद्वाक्यं तथा स्वाध्यायस्य वेदाभ्यसनं च वाङ्मयं वाचा निर्वर्त्यं तपः ॥१५ ॥

> मनःप्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः ।
> भावसंशुद्धिरित्येतत् तपो मानसम् उच्यते ॥१६ ॥

**श्रीधर**: मानसं तप आह मनःप्रसाद इति ।मनसः प्रसादः स्वच्छता ।सौमत्वम् अक्रूरता ।मौनं मुनेर्भावः ।मननम् इत्यर्थः ।आत्मनो मनसो विनिग्रहो विषयेभ्यः प्रत्याहारः ।भावसंशुद्धिर्व्यवहारे मायाराहित्यम् ।इत्येतन् मानसं तपः ॥१६ ॥

**बलदेव**: मनसः प्रसादः वैमल्यं विषयस्मृत्यवैयग्य्यम् ।सौमत्वम् अक्रौर्यम् सर्वसुखेच्छुत्वम् ।मौनम् आत्म मननम् ।आत्मनो मनसो विनिग्रहो विषयेभ्यः

प्रत्याहारः ।भावसंशुद्धिर्व्यवहारे निष्कपटता ।इत्येतन् मानसा निर्वर्त्यं तपः ॥१६ ॥

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७ ॥

**श्रीधरः** तदेवं शरीरवाङ्मनोभिर्निर्वर्त्यं त्रिविधं तपो दर्शितम् ।तस्य त्रिविधस्यापि तपसः सात्त्विकादिभेदेन त्रैविध्यम् आह श्रद्धयेत्यादित्रिभिः ।तत् त्रिविधम् अपि तपः परया श्रेष्ठया श्रद्धया फलाकाङ्क्षाशून्यैर्युक्तैरेकाग्रचित्तैर्नरैस्तप्तं सात्त्विकं कथयन्ति ॥१७ ॥

**विश्वनाथः** त्रिविधम् उक्तलक्षणं कायिकवाचिकमानसम् ॥१७ ॥

**बलदेवः** उक्तस्य तपसः सात्त्विकादितया त्रैविध्यम् आह श्रद्धयेतित्रिभिः । तदुक्तं त्रिविधं तपः फलाकाङ्क्षाशून्यैर्युक्तैरेकाग्रचित्तैर्नरैर्परया श्रद्धया तप्तम् अनुष्ठितं सात्त्विकम् ॥१७ ॥

सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलम् अध्रुवम् ॥१८ ॥

**श्रीधरः** राजसम् आह सत्कारेति ।सत्कारः साधुरयम् इति तापसोऽयम् इत्यादि वाक्पूजा ।मानः प्रतुत्थानाभिवादनादिर्दैहिकी पूजा ।पूजार्थलाभादिः । एतदर्थं दम्भेन च यत् तपः क्रियते ।अतएव चलम् अनियतम् ।अध्रुवं च क्षणिकम् ।यदेवम्भूतं तपस्तदिह राजसं प्रोक्तम् ॥१८ ॥

**विश्वनाथः** सत्कारः साधुरयम् इत्यन्यः कर्तव्या वाक्पूजा ।मानः प्रतुत्थानाभिवादनादिभिरन्यैः कर्तव्या दैहिकी पूजा ।पूजा अन्यैर्दीयमानैर्धनादिभिर्भाविनी वा मानसी पूजा तदर्थम् ।दम्भेन च यत् क्रियते तद्राजसं तपः ।चलम् किञ्चित्कालिकम् ।अध्रुवम् अनियतसत्कारादिफलकम् ॥१८ ॥

**बलदेवः** सत्कारः साधुरयं तपस्वीति स्तुतिः ।मानः प्रतुत्थानादिरादरः । पूजा चरणप्रक्षालनधन्दानदिस्तदर्थं यत् तपो दम्भेन च क्रियते तद्राजसं प्रोक्तम् । चलं किञ्चित्कालिकम् ।अध्रुवम् अनियतसत्कारादिफलकम् ॥१८ ॥

मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत् तामसम् उदाहृतम् ॥१९ ॥

**श्रीधरः** तामसं तप आह मूढेति । मूढग्राहेणाविवेककृतेन दुराग्रहेणात्मना पीडया यत् तपः क्रियते । परस्योत्सादनार्थं वा अन्यस्य विनाशार्थम् अभिचाररूपं तत् तामसम् उदाहृतं कथितम् ॥ १९ ॥

**विश्वनाथः** मूढग्राहेण मौढ्यग्रहणेन । परस्योत्सादनार्थं विनाशार्थम् ॥ १९ ॥

**बलदेवः** मूढग्राहेणाविवेकजेन दुराग्रहेणात्मना देहेन्द्रियादेः पीडया च यत् तपः परस्योत्सादनार्थं विनाशाय वा क्रियते तत् तामसम् ॥ १९ ॥

> दातव्यम् इति यद्दानं दीयतेऽनुपकारिणे ।
> देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥ २० ॥

**श्रीधरः** पूर्वं प्रतिज्ञातम् एव दानस्य त्रैविध्यम् आह दातव्यम् इति । दातव्यम् एवेत्येवं निश्चयेन यद्दानं दीयतेऽनुपकारिणे प्रतुपकारसमर्थाय । देशे कुरुक्षेत्रादौ काले ग्रहणादौ । पात्रे चेति देशकालसाहचर्यात् सप्तमी प्रयुक्ता । पात्रे पात्रभूताय तपःश्रुतादिसम्पन्नाय ब्राह्मणायेत्यर्थः । यद्वा पात्र इति तृजन्तम् । रक्षकायेत्यर्थः । चतुर्थ्येवैषा । स हि सर्वस्मादापद्गणाद्दातारं पातीति पाता । तस्मै यदेवम्भूतं दानं तत् सात्त्विकम् ॥ २० ॥

**विश्वनाथः** दातव्यम् इत्येवं निश्चयेन । न तु फलाभिसन्धिना यद्दानम् ॥ २० ॥

**बलदेवः** अथ दानस्य त्रैविध्यम् आह दातव्यम् इति । निश्चयेन यद्दानम् अनुपकारिणे पात्रे विद्यातपोभ्यां दातू रक्षकाय ब्राह्मणाय यद्दीयते तद्दानं सात्त्विकम् । अनुपकारिणे प्रतुपकारम् अनुद्दिश्येत्यर्थः । देशे तीर्थे काले च सङ्क्रान्त्यादौ ॥ २० ॥

> यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
> दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥ २१ ॥

**श्रीधरः** राजसं दानम् आह यदिति । कालान्तरेऽयं मां प्रत्युपकरिष्यतीत्येवम् अर्थं फलं वा स्वर्गादिकम् उद्दिश्य यत् पुनर्दानं दीयते परिक्लिष्टं चित्तक्लेशयुक्तं यथा भवति एवम्भूतं तद्दानं राजसम् उदाहृतम् ॥ २१ ॥

**विश्वनाथः** परक्लिष्टं कथम् एतावद्व्ययितम् इति पश्चात्तापयुक्तम् । यद्वा दित्सायां अभावेऽपि गुर्वाद्याज्ञान्नोधवशादेव दत्तम् । परिक्लिष्टम् अकल्याणद्रव्यकर्मकम् ॥ २१ ॥

**बलदेव**: यत् तु प्रतुपकारार्थं दृष्टफलार्थं फलं वा स्वर्गादिकम् अदृष्टम् उद्दिश्यानुसन्धाय दीयते तद्दानं राजसम् । परिक्लिष्टं कथम् एतावद्व्ययितव्यम् इति पश्चात्तापयुक्तं यथा स्यात् तथा गुरुवाक्यानुरोधाद्वा यद्दीयते तद्राजसम् ॥ २१ ॥

> अदेशकाले यद्दानम् अपात्रेभ्यश्च दीयते ।
> असत्कृतम् अवज्ञातं तत् तामसम् उदाहृतम् ॥ २२ ॥

**श्रीधर**: तामसं दानम् आह अदेशेति । अदेशेऽशुचिस्थाने । अकाले अशौचादिसमये । अपात्रेभ्यो विटनटनर्तकादिभ्यः । यद्दानं दीयते देशकालपात्रसम्पत्ताव-प्यसत्कृतं पादप्रक्षालनादिसत्कारशून्यम् । अवज्ञातं पात्रतिरस्कारयुक्तम् । एवम्भूतं दानं तामसम् उदाहृतम् ॥ २२ ॥

**विश्वनाथ**: असत्कारोऽवज्ञायाः फलम् ॥ २२ ॥

**बलदेव**: अदेशेऽशुचिस्थाने । अकालेऽशुचिसमये । यदपात्रेभ्यो नटादिभ्यो दीयते, देशादिसम्पत्तावपि यदसत्कृतं चरणप्रक्षालनादिसत्कारशून्यम् अवज्ञातं तूङ्कारा‌द्यनादरभाषणोपेतं च यद्दानं तत् तामसम् ॥ २२ ॥

> ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
> ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥
> तस्मादोम् इत्युदाहृत्य यज्ञदानतपःक्रियाः ।
> प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥ २४ ॥

**श्रीधर**: नन्वेवं विचार्यमाणे सर्वम् अपि यज्ञतपोदानादि राजसतामसप्रायम् एवेति व्यर्थो यज्ञादिप्रयास इत्याशङ्क्य तथाविधस्यापि सात्त्विकत्वोपपादनात् प्रकारं दर्शयितुम् आह ओम् इति । ओं तत् सदिति त्रिविधो ब्रह्मणः परमात्मनो निर्देशो नामव्यपदेशः स्मृतः शिष्टैः । तत्र तावदोम् इति ब्रह्म इत्यादि श्रुतिप्रसिद्धेरोम् इति ब्रह्मणो नाम । जगत्कारणत्वेनातिप्रसिद्धत्वादविदुषां परोक्षत्वाच्च तच्छब्दोऽपि ब्रह्मणो नाम । परमार्थसत्त्वसाधुत्वप्रशस्तत्वादिभिः सच्छब्दोऽपि ब्रह्मणो नाम । सदेव सौम्येदम् अग्र आसीत् इत्यादि श्रुतेः । अयं त्रिविधोऽपि नाम निर्देशेन ब्राह्मणाश्च वेदाश्च यज्ञाश् पुरा सृष्ट्यादौ विहिता विधात्रा निर्मिताः । सगुणीकृता इति वा । यथा यस्यायं त्रिविधो निर्देशस्तेन परमात्मना ब्राह्मणादयः पवित्रतमाः सृष्टाः । तस्मात् तस्यायं त्रिविधो निर्देशोऽतिप्रशस्त इत्यर्थः ॥ २३ ॥

इदानीं प्रत्येकम् ओङ्कारादीनां प्राशस्त्यं दर्शयिष्यन्न् ओङ्कारस्य तदेवाह तस्मादिति । यस्मादेवं ब्रह्मणो निर्देशः प्रशस्तस्तस्मादोम् इत्युदाहृत्य उच्चार्य कृता वेदवादिनां यज्ञाद्याः शास्त्रोक्ताः क्रियाः सततं सर्वदा अङ्गवैकल्येऽपि प्रकर्षेण वर्तन्ते । सगुणा भवन्तीत्यर्थः ॥ २४ ॥

**विश्वनाथ**ः तदेवं तपोयज्ञादीनां त्रैविध्यं सामान्यतो मनुष्यमात्रम् अधिकृत्योक्तम् । तत्र ये सात्त्विकेष्वपि मध्ये ब्रह्मवादिनस्तेषां तु ब्रह्मनिर्देशपूर्वका एव यज्ञादयो भवन्तीत्याह ओं तत् सदित्येवं ब्रह्मणो निर्देशो नाम्ना व्यपदेशः स्मृतः । शिष्टैर्देशितः । तत्र ओम् इति सर्वश्रुतिषु प्रसिद्धम् एव ब्रह्मणो नाम । जगत्कारणत्वेनातिप्रसिद्धेरतन्निरसनेन च प्रसिद्धेस्तदिति च । सदेव सौम्येदम् अग्र आसीत् इति श्रुतेः सदिति च । यस्मात् ओं तत् सत् शब्दवाच्येन ब्रह्मणैव ब्राह्मणा वेदा यज्ञाश्च विहिताः कृतास्तस्मात् ओम् इति ब्रह्मणो नामोदाहृत्योच्चार्य वर्तमानानां ब्रह्मवादिनां यज्ञादयः प्रवर्तन्ते ॥ २३-२४ ॥

**बलदेव**ः तदेवं तपोयज्ञतपोदानानां त्रैविध्यकथनेन सात्त्विकानां तेषाम् उपदेयत्वं, राजसादीनां हेयत्वं च दर्शितम् । अथ सात्त्विकाधिकारिणां यज्ञादीनि विष्णुनामपूर्वकाण्येवभवन्तीत्युच्यते ओम् इति । ओम् इत्यादिकस् त्रिविधो ब्रह्मणो विष्णोर्निर्देशो नामधेयं शिष्टैः स्मृतः । ओम् इत्येतद्ब्रह्मणो नेदिष्टं नाम इति श्रुतेः । ओम् इत्येकं नाम । तत् त्वम् असि इति श्रुतेः तदिति द्वितीयं नाम । सदेव सौम्य इति श्रुतेः सदिति तृतीयं नाम । उपलक्षणम् इदम् । विष्ण्वादिनाम्नां तेन त्रिविधेन निर्देशेन ब्राह्मणा वेदा यज्ञाश्च पुरा चतुर्मुखेन विहिताः प्रकटितास्तस्मान् महाप्रभावोऽयं निर्देशस्तत्पूर्वकाणां यज्ञादीनां नाङ्गवैगुण्यम् । तेन फलवैगुण्यं च नेति ॥ २३ ॥

यस्मादेवं तस्मादोम् इति निर्देशम् उदाहृत्योच्चार्यानुष्ठिता ब्रह्मवादिनां सात्त्विकानां त्रैवर्णिकानां यज्ञाद्याः क्रियाः प्रवर्तन्ते । अङ्गवैकल्येऽपि साङ्गतां भजन्तीति ॥ २४ ॥

**तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।**
**दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥ २५ ॥**

**श्रीधर**ः द्वितीयं नाम प्रस्तौतीति तदिति तदित्युदाहृत्य इति पूर्वस्यानुषङ्गः । तदित्युदाहृत्योच्चार्य शुद्धचित्तैर्मोक्षकाङ्क्षिभिः पुरुषैः फलाभिसन्धिम् अकृत्वा यज्ञाद्याः क्रियाः क्रियन्ते । अतश् चित्तशोधनद्वारेण फलसङ्कल्पत्यजनेन मुमुक्षुत्वसम्पादकत्वात् तच्छब्दनिर्देशः प्रशस्त इत्यर्थः ॥ २५ ॥

**विश्वनाथ**: तदित्युदाहृत्येति पूर्वस्यानुषङ्गः । अनभिसन्धाय फलाभिसन्धिम् अकृत्वा ॥ २५ ॥

**बलदेव**: तदिति निर्देशम् उदाहृत्य फलम् अनभिसन्धाय यज्ञादीक्रिया मोक्षकाङ्क्षिभिस्तैः क्रियन्ते अनुष्ठीयन्ते । निष्कामतया मुमुक्षासम्पादनान् महाप्रभावस् तच्छब्दः ॥ २५ ॥

**सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।**
**प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ २६ ॥**
**यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।**
**कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ २७ ॥**

**श्रीधर**: सच्छब्दस्य प्राशस्त्यम् आह सद्भाव इति द्वाभ्याम् । सद्भावेऽस्तित्वे । देवदत्तस्य पुत्रादिकम् अस्तीत्यस्मिन्न् अर्थे । साधुभावे च साधुत्वे । देवदत्तस्य पुत्रादि श्रेष्ठमित्यस्मिन्न् अर्थे । सदित्येतत् पदं प्रयुज्यते । प्रशस्ते माङ्गलिके विवाहादिकर्मणि च सदिदं कर्मेति सच्छब्दो युज्यते प्रयुज्यते । सङ्गच्छत इति वा ॥ २६ ॥

किं च यज्ञ इति । यज्ञादिषु च या स्थितिस् तात्पर्येनावस्थानं तदपि सदित्युच्यते । यस्य चेदं नामत्रयं स एव परमात्मा अर्थः फलं यस्य तत्तदर्थं कर्मपूजोपहारगृहाङ्गनपरिमार्जनोपलेपनरङ्गमाङ्गलिकादिक्रिया तत्सिद्ध्ये यदन्यत् कर्म क्रियत उद्यानशालिक्षेत्रधनार्जनादिविषयं तत् कर्म तदर्थीयम् । तच्चातिव्यवहितम् अपि सदित्येवाभिधीयते । यस्मादेवम् अतिप्रशस्तम् एतन् नामत्रयं तस्मादेतत् सर्वकर्मसाद्गुण्यार्थं कीरयेदिति तात्पर्यार्थः । अत्र चार्थवादानुपपत्त्या विधिः कल्प्यते । विधेयं स्तूयते वस्त्विति न्यायात् । अपरे तु प्रवर्तन्ते विधिनोक्ताः क्रियन्ते मोक्षकाङ्क्षिभिः इत्यादि वर्तमानोपदेशः समिधा यजतीत्यादिवद्विधितया परिणमनीय इत्याहुः । तत् तु सद्भावे साधुभावे चेत्यादिषु प्राप्तार्थत्वान् न सङ्गच्छत इति पूर्वोक्तक्रमेण विधिकल्पनैव ज्यायसी ॥ २७ ॥

**विश्वनाथ**: ब्रह्मवाचकः सच्छब्दः प्रशस्तेष्वपि वर्तते । तस्मात् प्रशस्तमात्रे कर्मणि प्राकृतेऽप्राकृतेऽपि सच्छब्दः प्रयोक्तव्य इत्याशयेनाह सद्भाव इति द्वाभ्याम् । सद्भावे ब्रह्मत्वे साधुभावे ब्रह्मवादित्वे प्रयुज्यते सङ्गच्छत इत्यर्थः ॥ २६ ॥

यज्ञादौ स्थितिर्यज्ञादितात्पर्येणावस्थानम् इत्यर्थः । तदर्थीयं कर्म ब्रह्मचर्योपयोगि यत् कर्म भगवन्मन्दिरमार्जनादिकम् तदपि ॥ २७ ॥

**बलदेव**: सदिति निर्देशः प्रशस्तेष्वर्थान्तरेषु वर्तते तस्मात् प्रशस्ते कर्ममात्रे स प्रयोज्य इति भावेनाह सद्भाव इति द्वाभ्याम् । सद्भावे ब्रह्मभावे साधुभावे च

ब्रह्मज्ञत्वेऽभिधायकतया सच्छब्दः प्रयुज्यते सदेव सौम्य इत्यादौ ।सतां प्रसङ्गात् इत्यादौ च । तथा प्रशस्ते उपनयनविवाहादिके च माङ्गलिके कर्मणि सच्छब्दो युज्यते सङ्गच्छते ।यज्ञादौ या तेषां स्थितिस्तात्पर्येणावस्थितिस्तदपि सदित्युच्यते ।यस्येदं नामत्रयं तदर्थीयं कर्म च तन्मन्दिरनिर्माणतद्विमार्जनादि सदित्यभिधीयते ।अत्र त्रिविधोऽयं निर्देशः स्मर्तव्य इति विधिः कल्प्यते ।वषट्कर्तुः प्रथमं भक्ष्यः इत्यादाविव वचनानि त्वपूर्वत्वादिति न्यायाद्यज्ञदानादिसंयोगाच्चास्य तद्वैगुण्यम् एव फलम् ।

प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

इति स्मरणाच्च ॥२६-२७ ॥

**अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।**
**असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह ॥२८ ॥**

**श्रीधरः** इदानीं सर्वकर्मसु श्रद्धयैव प्रवृत्त्यर्थम् अश्रद्धया कृतं सर्वं निन्दति अश्रद्धयेति ।अश्रद्धया हुतं हवनम् ।दत्तं दानम् ।तपस्तप्तं निर्वर्तितम् ।यच्चान्यदपि कृतं कर्म ।तत् सर्वम् असदित्युच्यते यतस्तत् प्रेत्य लोकान्तरे न फलति विगुणत्वात् ।नो इह न च अस्मिन् लोके फलति अयशस्करत्वात् ।

रजस्तमोमयीं त्यक्त्वा श्रद्धां सत्त्वमयीं श्रितः ।
तत्त्वज्ञानेऽधिकारी स्यादिति सप्तदशे स्थितम् ॥

इति श्रीश्रीधरस्वामिकृतायां भगवद्गीताटीकायां सुबोधिन्यां गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥१४ ॥

**विश्वनाथः** सत् कर्म श्रुतम् ।तथासत् कर्म किम् इत्यपेक्षायामाह अश्रद्धयेति ।हुतं हवनम् ।दत्तं दानम् ।तपस्तप्तं कृतम् ।यदन्यच्चापि कर्म कृतं तत् सर्वम् असदिति हुतम् अप्यहुतम् एव ।दत्तमप्यदत्तम् एव ।तपोऽप्यतप्तमेव कृतमप्यकृतम् एव ।यतस्तत् न प्रेत्य न परलोके फलति नापीहलोके फलति ॥२८ ॥

उक्तेषु विविधेष्वेव सात्त्विकं श्रद्धया कृतम् ।
यत् स्यात् तदेव मोक्षार्हम् इत्यध्यायार्थ ईरितः ॥
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतास्वयं सप्तदशः सङ्गतः सङ्गतः सताम् ॥

**बलदेवः** अथ सात्त्विक्या श्रद्धया सर्वेषु कर्मसु प्रवर्तितव्यम् ।तया विना सर्वं व्यर्थम् इति निन्दति अश्रद्धयेति । हुतं होमो । दत्तं दानम् । तप्तम् अनुष्ठितं यच्चान्यदपि स्तुतिप्रणत्यादिकर्म कृतं, तत् सर्वम् असन् निन्द्यम् इत्युच्यते । कुत इत्यत्राह न चेति ।हेतौ चशब्दो यतोऽश्रद्धया कृतं, तत् प्रेत्य परलोके न फलति विगुणात् तस्मात् पूर्वानुत्पत्तेर्नापीह लोके कीर्तिः सद्भिर्निन्दितत्वात् ॥२८ ॥

श्रद्धां स्वभावजां हित्वा शास्त्रजां तां समाश्रितः ।
निःश्रेयसाधिकारी स्यादिति सप्तदशी स्थितिः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये सप्तदशोऽध्यायः ॥१७ ॥